CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

5091

मैत्र्युपनिषत् ।

रामतीर्थविरचित दीपिकासहिता ।

ॐ ब्रह्मणे नमः ।

*प्रणम्य रामं प्रणताभयप्रदं
गुरूंस्तथा कृष्णमुखांस्तदात्मनः ।
मैत्रायणानां श्रुतिमौलिमर्थतः
प्रसाध्य विष्णोः परमे पदेऽर्पये ॥ १ ॥

"ब्रह्मयज्ञो वा एष" इत्याद्या मैत्रायणानामुपनिषत् । तस्याः पूर्वकाण्डेन सम्बन्धः । काण्डचतुष्टयात्मके पूर्वस्मिन् ग्रन्थेऽनेकानि कर्माण्यग्निहोत्रादीनि विहितानि । तानि चोच्चावचफलार्थतया श्रुतानि यद्यपि, तथापि न परमपुरुषार्थपर्यवसितानि, यतः साध्यफलानि तानि, साध्यञ्चानित्यं यत्कृतकं तदनित्यमिति नियमात् । श्रुतिश्चात्र भवति—

'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छान्दो० अ० ८) इति ।

'यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एव' (बृहदा० अ० १ । ब्रा० ४) इति च । तथा—

---

*गणाधिपतिमस्खल्पविघ्नध्वासं महोदरम् ।
विपदुत्तारणाभ्यासलम्बीकृतकरं नुमः ॥
अयं श्लोक आनन्दाश्रमग्रन्थावलीमुद्रितपुस्तकेऽधिको वर्तते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'यो वा एतदक्षरं गार्ग्यविदित्वास्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' (बृहदा० अ० ३। ब्रा० ८) इति च। तस्मात् स्वभावतो नित्यनिरतिशय-पुरुषार्थार्थिनः पुंसोऽभिलषितसाधनोपायप्रदर्शनाय प्रवर्तमानो वेदोऽनादिभवपरम्परानुभूतानेकविषयवासनावासितान्तःकरणं वास-नापरवशतया प्रवर्तमानं विषयासक्तमानसं प्रति सहसा विषय-प्रवणतापरावर्तने(१) परमपुरुषार्थरूपाविद्यानिवृत्तिपरमानन्दावि-र्भावसाधनप्रत्यगात्मतत्त्वब्रह्मप्रवणतामापाद्य परं ब्रह्मात्मतत्त्वं बोध-यितुमशक्नुवन्नादौ कर्माण्येव पुरुषार्थसाधनतयोपदिशति, पुनस्तत्रैव निष्ठां सम्पाद्य तन्निष्ठस्य नित्यनैमित्तिककर्मानुष्ठानप्रभावतः शनैः शुद्ध्यमानान्तःकरणस्य पुनरीश्वरार्पणबुद्ध्यैव निष्कामकर्मानुष्ठाना-दतितरां शुद्धान्तःकरणस्य नित्यानित्यवस्तुविवेकवत दृष्टादृष्टार्थ-भोगरागशून्यस्य शमदमादिसाधनवतो मोक्षमाचाकाङ्क्षिणो-ऽधिकारसम्पत्तिमालक्ष्य प्रत्यगात्मतत्त्वं ब्रह्माध्यारोपापवादन्यायेने-नावगमय्य स्वयञ्च तेनैवावगमेन सह तस्मिन्नेवात्मतत्त्वे ब्रह्मणि विलीयमानो ब्रह्मात्मभावाद्वयं सत्यज्ञानानन्तानन्दैकरसमवतिष्ठत इति पूर्वापरभावेन कर्मज्ञानकाण्डयोर्हेतुहेतुमद्भावः सम्बन्धः सिद्धः। तदनेन व्याख्येयोत्तरकाण्डस्य विषयप्रयोजनाधिकारिणो दर्शिताः। विषयस्य चात्मतत्त्वस्य वेदान्तापरमानासिद्धतया(२) व्याख्येयग्रन्थप्रतिपाद्यताऽर्थात् सिद्धेति सिद्धानुबन्धचतुष्टयमिमं ग्रन्थं पदशो यथामति व्याख्यास्यामः। पूर्वत्र चयनादिकर्माऽऽम्नातं,

(१) नाऽऽ इति पु० पा०। (२) वेदान्तर इति पु० पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मयज्ञो वा एष यत्पूर्वेषां चयनं । तस्माद्यज-मानश्चित्वैतानग्नीनात्मानमभिध्यायेत् । स पूर्णः खलु

तच्चाग्निष्टोमातिरिक्तानां सर्वेषां यज्ञक्रतूनां साधारणं, तावता सर्वाण्येव कर्माण्युपलक्षणत्वेन गृहीतानि, तथा च सर्वेषां कर्मणां परमात्मज्ञानजन्मोपकारकत्वेन परमपुरुषार्थहेतुत्वं दर्शयितुं श्रुतिः प्रवर्तते ॥

"ब्रह्मयज्ञो ० चयनं" इति । यदिदं पूर्वेषां कर्मप्रकरणोक्तानां कर्मणां चयनं चयनादि सर्वं कर्म एष ब्रह्मणः परमात्मनो यज्ञो यजनं पूजनं वै प्रसिद्धं, 'यज्ञो वै विष्णुर्यज्ञेनैव यज्ञं सन्तनोति' इति श्रुत्यन्तरात् । अत्र चयनग्रहणमस्यां शाखायां प्रथमकाण्डे चयनस्याम्नानात् । पूर्वत्र विहितानि सर्वाणि कर्माणि परमे-श्वरार्पणबुद्ध्या फलासक्तिं परित्यज्यानुष्ठेयानीति तात्पर्यार्थः । तथा च भगवानाह (गी० अ० ५ । श्लो० १०)

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" । इति ।

यस्माद्ब्रह्मपूजनार्थमेव सर्वं कर्म "तस्मात् ० ध्यायेत्" इति । यजमानः कर्मण्यधिकृत एतान् पूर्वोक्तानग्नीँश्चित्वा अग्निचयनान्तं सर्वं कर्म यथाधिकारं निर्वर्त्य तत्प्रभावलब्धान्तःकरणशुद्धिः सन्नात्मानं प्रत्यञ्चं वक्ष्यमाणलक्षणमभि अभितः सर्वात्मब्रह्म-भावेन ध्यायेत् निरन्तरं चिन्तयेदित्यर्थः । अत्र क्त्वाप्रत्ययनिर्दे-शोऽनुष्ठानात्मध्ययोर्नैरन्तर्यपरो न भवति, किन्तु पूर्वकालत्व-